नमस्कारेणेति तूष्णीमिति मन्त्रवर्ज्जितमिति चाभिधानादितत्परं वैदिकपरञ्च शूद्राधिकारे गौतमवचनम्। अनुमतोऽस्य नमस्कारो मन्त्र इति। सावित्रीं प्रणवं यजुर्लक्ष्मीं स्त्रीशूद्रयोर्नेच्छन्ति। सावित्रीं प्रणवं यजुर्लक्ष्मीं स्त्री शूद्रो यदि जानीयात् स मृतोऽधो गच्छतीति। इति तिथ्यादितत्त्वम् ॥*॥*॥ प्रसङ्गादत्र कायस्थोत्पत्तिर्लिख्यते। पाद्मे सृष्टिखण्डे।

"सृष्ट्यादौ सदसत्कर्म्मज्ञप्तये प्राणिनां विधिः।
क्षणं ध्याने स्थितस्यास्य सर्व्वकायाद्विनिर्गतः ॥
दिव्यरूपः पुमान् हस्ते मसीपात्रञ्च लेखनीम्।
चित्रगुप्त इति ख्यातो धर्म्मराजसमीपतः ॥
प्राणिनां सदसत्कर्म्मलेखाय स निरूपितः।
ब्रह्मणातीन्द्रियज्ञानी देवाग्न्योर्यज्ञभुक् स वै।
भोजनाच्च सदा तस्मादाहुतिर्दीयते द्विजैः ॥
ब्रह्मकायोद्भवो यस्मात् कायस्थो जातिरुच्यते।
नानागोत्राश्च तद्वंश्याः कायस्था भुवि सन्ति वै ॥"*॥

प्रकारान्तरम् यथा. स्कान्दे रेणुकामाहात्म्ये।

"एवं हत्वार्ज्जुनं रामः सन्धाय निशितान् शरान्।
एक एव ययौ हन्तुं सर्व्वानेवातुरान् नृपान् ॥
केचिद्गहनमाश्रित्य केचित् पातालमाविशन्।
सगर्भा चन्द्रसेनस्य भार्य्या दाल्भ्याश्रमं ययौ ॥
ततो रामः समायातो दाल्भ्याश्रममनुत्तमम्।
पूजितो मुनिना सद्योऽन्वर्घ्यपाद्यासनादिभिः ॥
ददौ मध्याह्नसमये तस्मै भोजनमादरात्।
रामस्तु भावयामास हृदिस्थं स्वमनोरथम्।
याचयामास रामाच्च कामं दाल्भ्यो महामुनिः ॥
ततो द्वौ परमप्रीतौ भोजनं चक्रतुर्मुदा।
भोजनानन्तरं दाल्भ्यः पप्रच्छ भार्गवं प्रति।
यत्त्वया प्रार्थितं देव तत्त्वं शंसितुमर्हसि ॥
राम उवाच।
तवाश्रमे महाभाग सगर्भा स्त्री समागता।
चन्द्रसेनस्य राजर्षेः क्षत्त्रियस्य महात्मनः ॥
तन्मे त्वं प्रार्थितं देहि हिंसेयं तां महामुने।
ततो दाल्भ्यः प्रत्युवाच ददामि तव वाञ्छितम्
दाल्भ्य उवाच।
स्त्रियं गर्भममुं बालं तन्मे त्वं दातुमर्हसि।
ततो रामोऽब्रवीद्दाल्भ्यं यदर्थमहमागतः ॥
क्षत्त्रियान्तकरश्चाहं तत्त्वं याचितवानसि।
प्रार्थितश्च त्वया विप्र कायस्थो गर्भ उत्तमः ॥
तस्मात् कायस्थ इत्याख्या भविष्यन्ति शिशोः शुभाः ॥
एवं रामो महाबाहुर्हित्वान्तर्गर्भमुत्तमम् ॥
निर्जगामाश्रमात्तस्मात् क्षत्त्रियान्तकरः प्रभुः।
कायस्थ एष उत्पन्नः क्षत्त्रिण्यां क्षत्त्रियात्ततः ॥
रामाज्ञया स दाल्भ्येन क्षत्त्रधर्म्माद्वहिष्कृतः।
कायस्थधर्म्मोऽस्मै दत्तश्चित्रगुप्तस्य यः स्मृतः ॥
तद्गोत्रजाश्च कायस्था दाल्भ्यगोत्रास्ततोऽभवन्।
दाल्भ्योपदेशतस्ते वै धर्म्मिष्ठाः सत्यवादिनः ॥
सदाचारपरा नित्यं रता हरिहरार्च्चने।
देवविप्रपितॄणाञ्च अतिथीनाञ्च पूजकाः ॥"*॥

प्रकारान्तरम्।

"माहिष्यवनितासूनुर्वैदेहात् यः प्रसूयते।
स कायस्थ इति प्रोक्तस्तस्य धर्म्मो विधीयते ॥
चस्वाहे श्यायां माहिष्या वैश्याद्विप्राजो वैदेहः।
लिपीनां देशजातानां लेखनं स समाचरेत् ॥
गणकत्वं विचित्रञ्च बीजपाटी प्रभेदतः।
अधमः शूद्रजातिभ्यः पञ्चसंस्कारवानसौ ॥
चातुर्वर्ण्यस्य सेवां हि लिपिलेखनसाधनाम्।
व्यवसायः शिल्पकर्म्म तज्जीवनमुदाहृतम् ॥
शिखां यज्ञोपवीतञ्च वस्त्रमारक्तमम्भसा।
स्पर्शनं देवतानाञ्च कायस्थाद्यो विवर्ज्जयेत् ॥"
इति कमलाकरभट्टकृतशूद्रधर्म्मतत्त्वम् ॥

शूद्रकृत्यं, क्ली, (शूद्रस्य कृत्यम्।) शूद्रकर्त्तव्यकर्म्म यथा,—

"प्रणम्य सच्चिदानन्दं शूद्राणां न्यायवर्त्तिनाम्।
श्राद्धाह्नःकृत्ययोस्तत्त्वं वक्ति श्रीरघुनन्दनः ॥"

तत्र मत्स्यपुराणम्।

"एवं शूद्रोऽपि सामान्यं वृद्धिश्राद्धञ्च सर्व्वदा।
नमस्कारेण मन्त्रेण कुर्य्यादामान्नवद्बुधः ॥
दानः प्रधानः शूद्रः स्यादित्याह भगवान् प्रभुः।
दानेन सर्व्वकामाप्तिरस्य संजायते यतः ॥"

ततो दानमेवापेक्षितं न तु भोजनमपि। सामान्यं सर्व्वजनकर्त्तव्यत्वेन प्रतिमासक्षणपक्षादिविहितश्राद्धं आभ्युदयिकश्राद्धञ्च एवं द्विजातिवत् शूद्रोऽपि कुर्य्यादित्यन्वयः। नमस्कारेण मन्त्रेण नतुस्वयं पठितमन्त्रेण आमान्नवदित्यनेनजलसेकसिद्धान्नव्यावृत्तिः। स्विन्नमन्नमुदाहृतम्। इति वशिष्ठेन स्विन्नस्यैवान्नत्वाभिधानात्।कन्दुपक्वस्य भृष्टत्वं नतु सिन्नत्वम्। हारीतेन स्वेदनभर्ज्जनयोः पृथक्त्वमुक्तम्। यथा। आदीपनतापनस्वेदनभर्ज्जनपचनादिभिः प्रपचमीति अस्यार्थः। आदीपनं काष्ठानाम् तापनं तोयादेः। स्वेदनं धान्यादेः। भर्ज्जनं यवादेः। पचनं तण्डुलादेः। इति पञ्चमी। सूना इति कल्पतरुः। अतएव स्विन्नधान्येन व्यवह्रियते।

"कन्दुपक्वानि तैलेन पायसं दधि शक्तवः।
द्विजैरेतानि भोज्यानि शूद्रगेहकृतान्यपि ॥"

इति कुर्म्मपुराणवचनेन शूद्रकर्त्तृककन्दुपक्वादेर्ब्राह्मणस्य भक्ष्यत्वेन श्राद्धे देयत्वं युक्तम्। कन्दुपक्वं जलोपसेकं विना केवलपात्रेण यदवह्निना पक्वम्। पायसं पाकेन काठिन्यविकारापन्नं दुग्धम्। परमान्नपरत्वे पुंलिङ्गनिर्द्देशापत्तेः ॥ तथा चामरः। परमान्नस्तु पायस इति।

"दिने त्रयोदशे प्राप्ते पाकेन भोजयेद्द्विजान्।
अयं विधिः प्रयोक्तव्यः शूद्राणां मन्त्रवर्ज्जितः ॥"

इति श्राद्धचिन्तामणिधृतवराहपुराणवचनमपि कन्दुपक्वपरम्। एवन्तु एतद्वचनं सच्छूद्रपरं मैथिलोक्तं हेयम्। एवं आममांसस्यापि श्राद्धे देयत्वं सामगश्राद्धतत्त्वेऽनुसन्धेयम्। तत्र द्रव्यदेवताप्रकाशार्थं ब्राह्मणेन मन्त्राः। पाठ्याः।

"अयमेव विधिः प्रोक्तः शूद्राणां मन्त्रवर्ज्जितः।
अमन्त्रस्य तु शूद्रस्य विप्रो मन्त्रेण गृह्यते ॥"
इति वराहपुराणात् ॥

अयं श्राद्धेतिकर्त्तव्यताको विधिः शूद्रकर्त्तृकमन्त्रपाठरहितः। शूद्रस्य मन्त्रपाठानधिकारसिद्धौ यदमन्त्रस्येति पुनर्वचनं तत् क्रिया ग्रहणार्थं परिभाषार्थञ्च। ततश्च तत्कर्म्मसम्बन्धिमन्त्रेण विप्रस्तदीयकर्म्मकारयितृब्राह्मणो गृह्यते। तेन ब्राह्मणेन तत्र मन्त्रः पठनीय इति तात्पर्य्यम्। तत्र यजुर्व्वेदिको मन्त्रः। तथा च स्मृतिः।

"आर्षक्रमेण सर्व्वत्र शूद्रा वाजसनेयिनः।
तस्माच्छूद्रः स्वयं कर्म्म यजुर्व्वेदीव कारयेत् ॥"

आर्षक्रमेण मुन्युक्तक्रमेण यजुर्वेदिसम्बन्धिगृह्यादिना।

"चतुर्णामपि वर्णानां यानि प्रोक्तानि वेधसा।
धर्म्मशास्त्राणि राजेन्द्र शृणु तानि नृपोत्तम ॥
विशेषतस्तु शूद्राणां पावनानि मनीषिभिः।
अष्टादश पुराणानि चरितं राघवस्य च ॥
रामस्य कुरुशार्दूल धर्म्मकामार्थसिद्धये।
तथोक्तं भारतं वीर पाराशर्य्येण धीमता।
वेदार्थं सकलं योज्यं धर्म्मशास्त्राणि च प्रभो ॥"

इति भविष्यपुराणवचनात्तेषां पौराणिकादिविधिर्योज्यो योजयिता। अत्र च श्राद्धे वेदमन्त्रवर्ज्जं शूद्रस्येतिवचने वेदेत्युपादानात् श्राद्धे पुराणमन्त्रः शूद्रेण पठनीय इति मैथिलोक्तम् तन्न वराहपुराणे शूद्राणां मन्त्रवर्ज्जित इत्यनेन मन्त्रमात्रनिषेधात् मत्स्यपुराणेन नमस्कारेण मन्त्रेण इत्युपादानाच्च। पौराणिकस्यापि श्राद्धे निषेधः प्रतीयते। एवं स्नानेऽपि।

"ब्रह्मक्षत्त्रविशामेव मन्त्रवत् स्नानमिष्यते।
तूष्णीमेव हि शूद्रस्य सनमस्कारकं मतम् ॥"

इत्यनेन नमस्कारविधानात् पञ्चयज्ञेऽपि।

"शूद्रस्य द्विजशुश्रूषा तथा जीवनवान् भवेत्।
शिल्पैर्वा विविधैर्जीवेत् द्विजातिहितमाचरन् ॥
भार्य्यारतिः शुचिर्भृत्यभर्त्ता श्राद्धक्रियारतः।
नमस्कारेण मन्त्रेण पञ्चयज्ञान्न हापयेत् ॥"

इति नमस्कारमात्रविधानात् श्राद्धादिषु पौराणिकमन्त्रनिषेधः ततश्च स्नानश्राद्धपञ्चयज्ञेतरत्र शूद्रस्य पौराणिकमन्त्रपाठः प्रतीयते। अत्र।

"षष्ठेऽन्नप्राशनं मासि यद्वेष्टं मङ्गलं कुले ॥"

इति मनुवचनात्। चूड़ा कार्य्या यथाकुलं इति याज्ञवल्क्यवचनाच्च संस्कारमात्रे कुलधर्म्मानुरोधेन कालान्तरस्य नामविशेषोच्चारणस्याभिधानाच्च शूद्रादीनां नामकरणे वसुघोषादिकपद्धतियुक्तनामकरणस्य च प्रतीतेर्व्वैदिककर्म्मणि शूद्रानां पद्धतियुक्तनामाभिधानं क्रियते इति॥ शूद्रस्त्वाचमने दैवतीर्थेन ओष्ठे जलं सकृत् क्षिपेत् न पिबेत्। तथा च याज्ञवल्क्यः।

"हृत्कण्ठतालुगाभिस्तु यथासंख्यं द्विजातयः।
शुध्येरन् स्त्री च शूद्रश्च सकृत् स्पृष्टाभिरन्ततः ॥"

अन्ततो हृदयादिसमीपेन ओष्ठेन उत्तरोत्तर·